संस्कृतवार्ता:

दिनाङ्क : 12.09.25 सायम् - 06:20

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्री श्रीनरेन्द्र-मोदी नवदिल्ल्यां ज्ञानभारतमित्यस्मिन् विषये अन्ताराष्ट्रियसम्मेलने सम्मिलित:। सः ज्ञानभारतम् पोर्टल् इति डिजिटलमञ्चस्य शुभारंभोपि कृतवान्।
- श्री सी.पी. राधाकृष्णन् वर्य् भारतस्य पञ्चदशतमस्य उपराष्ट्रपति पदस्य शपथग्रहणं कृतवान्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सीपी-राधाकृष्णन् वर्यं नागरिकाणां सेवायां समर्पितस्य तस्य उपराष्ट्रपतिपदस्य कार्यकालाय शुभकामना: प्रदत्ता।
- नेपाल-देशे अन्तरिम-सर्वकारस्य प्रधानमन्त्रिणः नियुक्तये संवादः द्विदिनानन्तरम् अपि निष्कर्षे न प्राप्तः।
- फिडे-ग्रैण्ड्-स्विस्-चेस्-प्रतियोगितायां, भारतीयः ग्राण्ड्मास्टर् निहाल्-सरीन् इत्येषः परम्-मघसूदलू इत्यमुं पराजित्य सप्तम-चरणस्य अनन्तरं अग्रतां प्राप्नोत्।

**अथ वार्ता: विस्तरेण**

**प्रधानमन्त्री ज्ञानभारतम्**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी नवदिल्लीनगरे ज्ञानभारतमित्यस्मिन् विषये अन्ताराष्ट्रियसम्मेलने सम्मिलित:। सः पाण्डुलिप्याः अङ्कीकरणस्य, संरक्षणस्य, जनपरिवेषणस्य च त्वरितरूपेण निष्पादनाय समर्पितं ज्ञानभारतम् पोर्टल् इति डिजिटलमञ्चस्य शुभारंभोपि कृतवान्, अथ अस्मिन् अवसरे सभामपि सम्बोधितवान्। अवधेयम्, यत् "पाण्डुलिपिपरम्परायाः माध्यमेन भारतस्य ज्ञानपरम्परायाः पुनः प्राप्तिः" इत्यस्मिन् विषये ह्यः एव त्रिदिवसीयसम्मेलनस्य आरम्भः अभवत् ।

सम्मेलन-माध्यमेन, भारतस्य अप्रतिमपाण्डुलिपिसम्पदः पुनः सम्पुष्टीकरणस्य मार्गेषु विचारं कर्तुं, वैश्विकज्ञानसंवादस्य हृदये स्थापयितुं च, प्रमुखविद्वांसः, संरक्षणविदः, प्रौद्योगिकीविदः, नीतिविशेषज्ञाः च एकत्र आगताः सन्ति।

**उपराष्ट्रपति**

राष्ट्रपति: द्रौपदी मुर्मु: अद्य राष्ट्रपति भवने आयोजिते शपथग्रहण समारोहे श्री सी.पी. राधाकृष्णन् वर्यं भारतस्य पञ्चदशतमस्य उपराष्ट्रपति पदस्य शपथग्रहणं करितवती।

**बाइट-ओथ ऑफ वाइस प्रेसीडेंट-32 से.**

अस्मिन् शपथग्रहण समारोहे प्रधानमन्त्री नरेन्द्रमोदी, पूर्वराष्ट्रपतिः रामनाथ कोविंदः, पूर्वउपराष्ट्रपतिः जगदीप धनखडः, अमितशाहः, राजनाथ सिंहः, जेपी नड्डा, नितिन गडकरी एवं अन्येऽपि केन्द्रीय मन्त्रिणः उपस्थिताः आसन्। शपथ ग्रहणानन्तरं उपराष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः राजघाटस्थले महात्मागान्धिने पुष्पांजलिं समर्पितवान्। तेन सदैव अटलेत्यत्र पूर्वप्रधानमन्त्रिणं अटलबिहारी-बाजपेयी वर्यं अपि श्रृद्धांजलिः समर्पिता। अवधेयं यत् अस्य मासस्य नवमे दिनांके उपराष्ट्रपतिः निर्वाचने श्री राधाकृष्णन् वर्येण द्विपञ्चाशदधिक चतुः शतानि मतानि सम्प्राप्य तेन बी सुदर्शन रेड्डी वर्यं द्विपञ्चाशदधिकैकशत मतैः पराजितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सीपी-राधाकृष्णन् वर्यं नागरिकाणां सेवायां समर्पितस्य तस्य सफल उपराष्ट्रपतिपदस्य कार्यकालाय शुभकामनाः प्रदत्ता। श्रीमोदिना एकस्मिन् सोशलमीडिया सन्देशे उक्तं यत् श्रीराधाकृष्णन् वर्यः एकः समर्पितः लोक सेवकः अस्ति तेन स्वकीयं सम्पूर्णं जीवनं राष्ट्रनिर्माणे, समाजिक कार्ये, लोकतन्त्रं सुदृढीकरणे समर्पितम्।

## प्रधानमन्त्री-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः आरभ्य अस्य मासस्य पञ्चदश दिनाङ्कपर्यन्तं मिजोरम्, मणिपुर्, असम्, पश्चिमबङ्गाल, बिहारराज्यानां यात्रां करिष्यति। मिजोरम्-राज्यस्य प्रवासकाले प्रधानमन्त्री नव सहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं उद्घाटनं च करिष्यति। तस्मिन् एव दिने मणिपुरस्य प्रवासकाले सः अष्टशताधिकशतकोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं करिष्यति। असम्-राज्यस्य प्रवासावधौ श्रीमोदी राजधान्यां गौहाटी-नगरे डा. भुपेन् हजारिका-वर्यस्य शततमस्य जन्मवार्षिकोत्सवे भागं ग्रहीष्यति। अस्मिन् अवसरे सः एकां सभाम् अपि सम्बोधयिष्यति। प्रधानमन्त्री राज्ये अष्टादश-सहस्र-कोटिरूप्यकाणां प्रमुख आधारभूत संरचनायाः औद्योगिकविकासस्य च परियोजनानां उद्घाटनं शिलान्यासम् चापि करिष्यति। यात्रायाः अन्तिमे चरणे, प्रधानमन्त्री पश्चिमबङ्गालराज्यं गत्वा राजधान्यां कोलकातानगरे षोडशतमस्य कम्बाईंड कमाण्डर्स् सम्मेलनस्य उद्घाटनं करिष्यति। श्रीमोदी बिहारराज्ये गत्वा पूर्णिया-विमानस्थानकस्य नूतनस्य टर्मिनल्-भवनस्य उद्घाटनम् करिष्यति। सः राष्ट्रिय-मखाना-मण्डलम् अपि उद्घाटयिष्यति तथा च पूर्णिया-नगरे प्रायः षड्त्रिंशत्-सहस्र-कोटि-रूप्यकाणां बहुविध-विकास-परियोजनानां उद्घाटनं करिष्यति।

## नेपाल्-देशस्य सेनाध्यक्षः

अन्तरिम-सर्वकारस्य प्रधानमन्त्रिणः नियुक्तये ज़ेन जी-प्रतिनिधिनां नेपाल-सेनाध्यक्षस्य आशिकराज सिगडेल इत्यस्य नेपालराष्ट्रपतिनः रामचन्द्र पौडेलस्य च मध्ये संवादः द्विदिनानन्तरम् अपि निष्कर्षे न प्राप्तः। गतरात्रौ राष्ट्रपतिः ,अध्यक्षः देवराज- घिमिरः च संयुक्तवक्तव्ये उक्तवन्तौ यत् वर्तमानस्थितौ संविधानस्य अन्तर्गतं समाधानं अन्विष्यते संसदः विघटन-विषये चर्चायां न कोऽपि निर्णयः जातः।

## मॉरीशस-देशस्य प्रधानमन्त्री

मॉरीशस-देशस्य प्रधानमन्त्री डॉ. नवीन-चन्द्र-राम-गुलामः अयोध्यायां सम्प्राप्त्यनन्तरं श्रीरामचन्द्रस्य मन्दिरे पूजार्चनं कृतवान्।अन्ताराष्ट्रिय-महर्षि-वाल्मीकि-विमान-स्थले मुख्यमन्त्री- योगी आदित्यनाथः कृषिमन्त्री सूर्यप्रतापश्च तस्य पारम्परिकरित्या स्वागतं विहितवन्तौ। डॉ. नवीन- चंद्र -राम -गुलामः श्रीरामचन्द्रस्य मन्दिरे पूजार्चनां कृत्वा अन्ताराष्ट्रीय-महर्षि-वाल्मीकि-विमान-स्थलेन देहरादूनाय प्रस्थानम् कृतवान् ।

**छत्तीसगढ-एन्काउण्टर्-**

अद्य छत्तीसगढ-राज्ये माओवादिनां सुरक्षाबलानां च मध्ये जाते संघर्षे द्वौ माओवादिनौ मृतौ। बस्तर संभागस्य बीजापुरमण्डले जनपदस्य दक्षिण पश्चिम क्षेत्रे माओवादिनः उपस्थितेः सुरक्षाबलेन गुप्तसूचना प्राप्ता आसीत्। सुरक्षासेनानां संयुक्तदलम् अन्वेषणकार्यार्थं प्रस्थितम् आसीत्, अद्य प्रातः उभयोः मध्ये द्वन्द्वं समारब्धम्। सुरक्षाबलेन अस्मिन् क्षेत्रे अन्वेषणावधौ मृतानां माओवादिनां शवाः प्राप्ताः। एतदतिरिच्य, स्थानात् एकं राइफल, विस्फोटकानि च प्राप्तानि सन्ति। अस्मिन् क्षेत्रे अन्वेषणकार्यम् अधुनापि प्रचलति।

**माण्डवीयः-क्रीडासमितिः-**

भारतस्य प्रत्येकः मार्गः क्रीडाङ्गणः भवितुम् अर्हति तथा च प्रत्येकः मञ्चः भारतस्य ध्वजारोहणस्य साक्षी भवितुम् अर्हति इति युव-प्रकरणानां-क्रीडामन्त्री डा. मनसुख माण्डवीयः उक्तवान्। अद्य नवदिल्ल्यां निजी-वार्ता वाहिन्या आयोजिते क्रीडा-शिखरसम्मेलने मन्त्रिणा भारतं विश्वस्य पञ्च-श्रेष्ठ-क्रीडा-राष्ट्रेषु अन्यतमं कर्तुं स्व मनोभावं प्रकटितम्।

**फिडे- ग्रैण्ड-स्विस-शतरञ्ज-**

फिडे-ग्राण्ड्-स्विस्-चेस्-प्रतियोगितायां, भारतीयः ग्राण्ड्मास्टर् निहाल्-सरीन् इत्येषः परहम्-मघसूड्लू इत्यमुं पराजित्य सप्तम-चरणस्य अनन्तरं अग्रतां प्राप्नोत्।

।। इति वार्ताः।।